श्री काळी शांति स्तोत्रं

श्री काळी शांति स्तोत्रं

काळी काळि महाकाळि काळिके पापहारिणि |
धर्ममोक्षप्रदे देवि गुह्यकाळि नमोऽस्तु ते || 1 ||

संग्रामे विजयं देहि धनं देहि सदा गृहे |
धर्मकामार्थसंपत्तिं देहि काळि नमोऽस्तु ते || 2 ||

उल्कामुखि ललज्जिह्वे घोररावे भगप्रिये |
श्मशानवासिनि प्रेते शवमांसप्रियेऽनघे || 3 ||

अरण्य चारिणि शिवे कुलद्रव्यमयीश्वरि |
प्रसन्नाभव देवेशि भक्तस्य मम काळिके || 4 ||

शुभानि संतु कौलानां नश्यंतु द्वेषकारकाः |
निंदाकरा क्षयं पांतु ये च हास्य प्रकुर्वते || 5 ||

ये द्विषंति जुगुप्संते ये निंदंति हसंति ये |
येऽसूयंते च शंकंते मिथ्येति प्रवदंति ये || 6 ||

ते डाकिनीमुखे यांतु सदारसुतबांधवाः |
पिबत्वं शोणितं तस्य चामुंडा मांसमत्तु च || 7 ||

आस्थीनिचर्वयंत्वस्य योगिनी भैरवीगणाः |
यानिंदागमतंत्रादौ या शक्तिषु कुलेषु या || 8 ||

कुलमार्गेषु या निंदा सा निंदा तव काळिके |
त्वन्निंदाकारिणां शास्त्री त्वमेव परमेश्वरि || 9 ||

न वेदं न तपो दानं नोपवासादिकं व्रतं |
चांद्रायणादि कृच्छं च न किंचिन्मानयाम्यहं || 10 ||

किंतु त्वच्चरणांभोज सेवां जाने शिवाज्ञया |
त्वदर्चा कुर्वतो देवि निंदापि सफला मम || 11 ||

राज्यं तस्य प्रतिष्ठा च लक्ष्मीस्तस्य सदा स्थिरा |
तस्य प्रभुत्वं सामर्थ्यं यस्य त्वं मस्तकोपरि || 12 ||

धन्योऽहं कृतकृत्योऽहं सफलं जीवतं मम |
यस्य त्वच्चरणद्वंदे मनो निविशते सदा || 13 ||

दैत्याः विनाशमायांतु क्षयं यांतु च दानवाः |
नश्यंतु प्रेतकूष्मांडा राक्षसा असुरास्तथा || 14 ||

पिशाच भूत वेताळां क्षेत्रपाला विनायकाः |
गुह्यकाः घोणकाश्चैव विलीयंता सहस्रधा || 15 ||

भारुंडा जंभकाः स्कांदाः प्रमथाः पितरस्तथा |
योगिन्यो मातरश्चापि डाकिन्यः पूतनास्तथा || 16 ||

भस्मीभवंतु सपदि त्वत् प्रसादात् सुरेश्वरि |
दिवाचरा रात्रिचरा ये च संध्याचरा अपि || 17 ||

शाखाचरा वनचराः कंदराशैलचारिणः |
द्वेष्टारो ये जलचरा गुहाबिलचरा अपि || 18 ||

स्मरणादेव ते सर्वे खंडखंडा भवंतु ते |
सर्पा नागा यातुधाना दस्युमायाविनस्तथा || 19 ||

हिंसका विद्विषो निंदाकरा ये कुलदूषकाः |
मारणोच्चाटनोन्मूल द्वेष मोहनकारकाः || 20 ||

कृत्याभिचारकर्तारः कौलविश्वासघातकाः |
त्वत्प्रसादाज्जगद्धात्रि निधनं यांतु तेऽखिलाः || 21 ||

नवग्रहाः सतिथयो नक्षत्राणि च राशयः |
संक्रांतयोऽब्दा मासाश्च ऋतवो द्वे तथायने || 22 ||

कलाकाष्ठामुहुर्ताश्च पक्षाहोरात्रयस्तथा |
मन्वंतराणि कल्पाश्च युगानि युगसंधयः || 23 ||

देवलोकाः लोकपालाः पितरो वह्नयस्तथा |
अध्वरा निधयो वेदाः पुराणागमसंहिता || 24 ||

एते मया कीर्तिता ये ये चान्ये नानुकीर्तिताः |
आज्ञया गुह्यकाळ्यास्ते मम कुर्वंतु मंगळं || 25 ||

भवंतु सर्वदा सौम्याः सर्वकालं सुखावहाः |
आरोग्यं सर्वदा मेऽस्तु युद्धे चैवापराजयः || 26 ||

दुःखहानिः सदैवास्तां विघ्ननाशः पदे पदे |
अकालमृत्यु दारिद्र्यं बंधनं नृपतेर्भयं || 27 ||

गुह्यकाळ्याः प्रसादेन न कदापि भवेन्मम |
संत्विंद्रियाणि सुस्थानि शांतिः कुशलमस्तु मे || 28 ||

वांछाप्तिर्मनसः सौख्यं कल्याणं सुप्रजास्तथा |
बलं वित्तं यशः कांतिर्वृद्धिर्विद्या महोदयः || 29 ||

दीर्घायुरप्रधृष्यत्वं वीर्यं सामर्थ्यमेव च |
विनाशो द्वेषकर्तृणां कौलिकानां महोन्नतिः |
जायतां शांतिपाठेन कुलवर्त्म धृतात्मनां || 30 ||

इति श्री काळी शांति स्तोत्रं |